योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०८६

षडशीतितमः सर्गः ८६

चूडालोवाच ।।

आत्मस्वभाववशतो जातं जगदिदं महत् ।

स्थितिं वासनयाभ्येत्य धर्माधर्मवशे स्थितम् ।। १

वासनाह्रासमानीय धर्माधर्मैर्न गृह्यते ।

ततो न जायते जन्तुरिति नो दर्शनं मुने ।। २

शिखिध्वज उवाच ।

अत्युदारं महार्थं च वक्षि त्वं वदतां वर ।

अनुभूतिमुपारूढं गूढं च परमार्थवत् ।। ३

त्वद्वाक्यविभवेनाद्य श्रुतेनानेन सुन्दर ।

पीतेनेवामृतेनाहमन्तर्यातोऽस्मि शीतताम् ।। ४

तत्समासेन तां तावदात्मोत्पत्तिं वदाशु मे ।

ततः श्रोष्यामि यत्नेन ज्ञानगर्भां गिरं तव ।। ५

तेन पद्मजपुत्रेण मुनिना नारदेन तत् ।

क्व कृतं वीर्यमार्येण कथयाद्य यथास्थितम् ।। ६

चूडालोवाच ।

ततो निबध्नता तेन मनोमत्तमतङ्गजम् ।

विवेकविपुलालाने शुद्धया धीवरत्रया ।। ७

तद्वीर्यं कल्पकालाग्निगलितेन्दुद्रवोपमम् ।

रसानां पारदादीनां दिव्यानामनुरञ्जनम् ।। ८

मुनिना पार्श्वगे कुम्भे स्फाटिके विलसद्रुचौ ।

अद्भुते विद्रुताकारं चन्द्रे चन्द्र इवार्पितम् ।। ९

तत्र शैले बृहत्कान्ते स्थूलः पार्श्वेषु चाभितः ।

गम्भीरकुक्षिः सुदृढश्चोपलाहननक्षमः ।। १०

संकल्पितेन क्षीरेण स कुम्भस्तेन पूरितः ।

अमृतापूरभिन्नेन विधिनेवामृतार्णवः ।। ११

तत्र मासाद्गतो वृद्धिं मुनिमन्दाहुतिक्रमः ।

अमृताब्धौ शुभो गर्भ इन्दोरिन्दुरिवानुजः ।। १२

इन्दुं मास इवापूर्णं कालेन सुषुवे घटः ।

गर्भं कमलपत्राक्षं प्रसूनमिव माधवः ।। १३

परिपूर्णसमस्ताङ्गः कुम्भाद्गर्भो विनिर्ययौ ।

इन्दुः सूक्ष्मादिवाम्भोधेरपरः क्षयवर्जितः ।। १४

दिनैः कतिपयैरेव वृद्धिमभ्याजगाम सः ।

अप्रमेयाङ्गसौन्दर्यः शुक्लपक्षे शशी यथा ।। १५

सर्वसंस्कारसंपन्ने स तस्मिन्नारदो मुनिः ।

भाण्डाद्भाण्ड इवाशेषं विद्याधनमयोऽजयत् ।। १६

दिनैः कतिपयैरेव विज्ञाताशेषवाङ्मयम् ।

चकारैनं मुनिवरः प्रतिबिम्बमिवात्मनः ।। १७

तेनाराजत पुत्रेण मुनिना मुनिनायकः ।

रत्नाद्रौ प्रतिबिम्बेन संध्योदित इवोडुराट् ।। १८

अथैनं पुत्रमादाय ब्रह्मलोकं स नारदः ।

जगामाथ स्वपितरं ब्रह्माणं चाभ्यवादयत् ।। १९

कृताभिवन्दनं ब्रह्मा पौत्रमादाय तं तदा ।

अभिवादितवेदादिं स्वयमङ्के न्यवेशयत् ।। २०

अथाशीर्वादमात्रेण सर्वज्ञं ज्ञानपारगम् ।

पौत्रं तं कुम्भनामानं चकार कमलोद्भवः ।। २१

साधो सोऽहमयं कुम्भः पौत्रोऽहं पद्मजन्मनः ।

पुत्रोऽहं नारदमुनेः कुम्भनामास्मि कुम्भजः ।। २२

निवसाम्यब्जजपुरे पित्रा सह यथासुखम् ।

चत्वारः सुहृदो वेदा मम लीलाविलासिनः ।। २३

मातृष्वसा मे गायत्री मम माता सरस्वती ।

ब्रह्मलोके मम गृहं पौत्रस्तत्रास्मि सुस्थितः ।। २४

यथाकाममशेषेण जगन्ति विहराम्यहम् ।

लीलया परिपूर्णत्वान्न तु कार्येण केनचित् ।। २५

धरां पतति मे पादौ पततो न महीतले ।

रजः स्पृशन्ति नाङ्गानि ग्लानिं नायाति मे वपुः ।। २६

अद्याकाशपथा गच्छन्दृष्टवांस्त्वामहं पुरः ।

इह तेनागतोऽस्म्यङ्ग सर्वं कथितवानिति ।। २७

एषोऽहमित्यखिलमेव यथानुभूतं

ते वर्णितं ननु मया वनवासतज्ज्ञ ।

सन्तो हि संकथनमार्यजनोत्तमेषु

निर्मान्त्यलं सुभगसंव्यवहारदक्षाः ।। २८

श्रीवाल्मीकिरुवाच ।

इत्युक्तवत्यथ मुनौ दिवसो जगाम

सायंतनाय विधयेऽस्तमिनो जगाम ।

स्नातुं सभा कृतनमस्करणा जगाम

श्यामाक्षये रविकरैश्च सहाजगाम ।। २९

इत्यार्षे श्रीवासिष्ठमहारामा० वा० दे० मो० निर्वाणप्रकरणे पू० चूडालोपाख्याने कुम्भजननकथनं नाम षडशीतितमः सर्गः ।। ८६ ।।।

।। अष्टादशो दिवसः ।।